# Nrisimhastavanaharah

# નૃસિંહસ્તવનહારઃ

## Document Information

Text title : Nrisimhastavanaharah

File name : nRRisiMhastavanahAraH.itx

Category : vishhnu, dashAvatAra, stava, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# નૃસિંહસ્તવનહારઃ

નમો ભગવતે તુભ્યં પુરુષાય મહાત્મને ।
હરયેઽદ્ભુતસિંહાય બ્રહ્મણે પરમાત્મને ॥ ૧॥

વાગીશા યસ્ય વદને લક્ષ્મીર્યસ્ય વક્ષસિ ।
યસ્યાસ્તે હૃદયં સંવિત્ તં નૃસિંહમહં ભજે ॥ ૨॥

સત્યજ્ઞાનસુખસ્વરૂપમમલં ક્ષીરાબ્ધિમધ્યસ્થલં
યોગારૂઢમતિપ્રસન્નવદનં ભૂષાસહસ્રોજ્જ્વલમ્ ।
ત્ર્યક્ષં ચક્રપિનાકસાભયવરાન્ બિભ્રાણમર્કચ્છવિં
છત્રીભૂતફણીન્દ્રમિન્દુધવલં લક્ષ્મીનૃસિંહં ભજે ॥ ૩॥

ત્રાહીતિ વ્યાવહરન્તં ત્રિદશરિપુસુતં ત્રાતુકામો રહસ્યે
વિસૃસ્તં પીતવસ્ત્રં નિજકટિયુગુલે સવ્યહસ્તેન ગૃહ્ણન્ ।
વેગશ્રાન્તં નિતાન્તં ખગપતિમમૃતં પાયયન્નન્યપાણૌ ।
સિંહાદ્રૌ શીઘ્રપાતઃ ક્ષિતિપિહિતપદઃ પાતુ માં નારસિંહઃ ॥ ૪॥

નરસિંહો મહાદેવો મહાદેવાર્તિનાશનઃ ।
મુદે પરો મહાલક્ષમ્યા(ક્ષ્મ્યા) દેવાવર નમોઽસ્તુ તે ॥ ૫॥

નૃસિંહ ઉત્સઙ્ગસમુદ્રજાયાં સમુદ્રજદ્વીપગૃહે નિષણ્ણઃ ॥

સમુદ્રજો હીનમતિઃ સદાવ્યાત્ સમુદ્રભક્તાખિલ સિદ્ધિદાયી ॥ ૬॥

રાજા લક્ષ્મીનૃસિંહો જયતિ સુખકરં શ્રીનૃસિંહં ભજેયં
દૈત્યાધીશૌ મહાન્તૌ હરત નૃહરિણા શ્રીનૃસિંહાય નૌમિ ।
સેવ્યો લક્ષ્મીનૃસિંહાદપર ઇહ નહિ શ્રીનૃસિંહસ્ય પાદૌ
સેવે લક્ષ્મીનૃસિંહે વસતુ મમ મનઃ શ્રીનૃસિંહાવભક્તમ્ ॥ ૭॥

લોકાનાકુલયન્ નભઃ કવલયન્ દિક્કુમ્ભિતઃ કમ્પયન્
ભૂગોલં ચલયન્ ત્રિરીત્વિદલયન્ અમ્ભોધિમુદ્વેલયન્ ।
દિગ્વૃન્દં ભ્રમયન્ મનોવિકસયન્ બ્રહ્માણ્ડમાસ્ફોટયન્

સ્તમ્ભાદાવિરભૂદ્ભવં પ્રતિ તદા વૈકુણ્ઠકણ્ઠીરવઃ ॥ ૮॥

તપનસોમહુતાશનલોચનં ઘનવિરામહિમાંશુસમપ્રભમ્ ।
અભયચક્રપિનાકવરાન્કરૈર્દધતામિન્દુધરં નૃહરિં ભજે ॥ ૯॥

શ્રીમન્નૃકેસરિતનો જગદેકબન્ધો
શ્રીનીલકણ્ઠ કરુણાર્ણવ સામરાજ ।
વહ્નીન્દુતીવ્રકરનેત્ર પિનાકપાણે
શીતાંશુશેખર રમેશ્વર પાહિ વિષ્ણો ॥ ૧૦॥

ક્ષીરાબ્ધૌ વસુમુખ્યદેવનિકરૈરગ્રાદિસંવેષ્ટિતઃ
શઙ્ખચક્રગદામ્બુજં નિજકરૈર્બિભ્રંસ્ત્રિનેત્રાસિતઃ ।
સર્પાધીશફણાતપત્રલસિતઃ પીતામ્બરાલઙ્કૃતો
લક્ષ્મ્યાશ્લિષ્ટકલેવરો નરહરિસ્તાં નીલકણ્ઠો મુદે ॥ ૧૧॥

વ્યાધૂતકેસરસટાવિકરાલવક્ત્રં
હસ્તાગ્રવિસ્ફુરિતશઙ્ખગદાસિચક્રમ્ ।
આવિષ્કૃતં સપદિ યેન નૃસિંહરૂપં
નારાયણં તમપિ વિશ્વસૃજં નમામિ ॥ ૧૨॥

કોપાદાલોલજિહ્વં વિવૃતનિજમુખં સોમસૂર્યાગ્નિનેત્રં
પાદાદાનાભિરક્તપ્રભુમુપરિસતં ભિન્નદૈત્યેન્દ્રગાત્રમ્ ।
શઙ્ખં ચક્રં ચ પાશાઙ્કુશકુલિશગદાદારુણાન્યુદ્વહન્તં
ભીમં તીક્ષ્ણોગ્રદંષ્ટ્રં મણિમયવિવિધાકલ્પમીડે નૃસિંહમ્ ॥ ૧૩॥

ચરણસ્મરણપ્રેમ્ણા તવ દેવ સુદુર્લભમ્ ।
યથાકથઞ્ચિન્નૃહરે મમ ભૂયાદહર્નિશમ્ ॥ ૧૪॥

ક્વાહં બુદ્ધ્યાદિસંરુદ્ધઃ ક્વ ચ ભૂમન્મહસ્તવ ।
દીનબન્ધો દયાસિન્ધો ભક્તિં મે નૃહરે દિશ ॥ ૧૫॥

નરવપુપ્રતિપદ્ય ત્વયિ યદિ શ્રવણવર્ણનસંસ્મરણાદિભિઃ ।
નરહરે ન ભજન્તિ નૃણામિદમિતિ વપુચ્છવસિતં વિફલં તતઃ ॥ ૧૬॥

ત્વદીક્ષણવશ ક્ષોભમાયાબોધિતકર્મભિઃ ।
જાતાન્સંસરતઃ ખિન્ના નૃહરે પાહિ નઃ પિતઃ ॥ ૧૭॥

અન્તર્યન્તા સર્વલોકસ્ય ગીતઃ શ્રુત્યા યુક્ત્યા ચૈવમેવાવસે યઃ ।
યઃ સર્વજ્ઞઃ સર્વશક્તિર્નૃસિંહઃ શ્રીમન્તં તં ચેતસૈવાવલમ્બે ॥ ૧૮॥

યસ્મિન્નુદ્યદ્વિલયમપિ યદ્ ભાતિ વિશ્વં લયાદૌ
જીવોપેતં ગુરુકરુણયા કેવલાત્માવબોધે ।
અન્ત્યન્તાં તં વ્રજતિ સહસા સિન્ધુવત્સિન્ધુમધ્યે
મધ્યે ચિત્તં ત્રિભુવનગુરું ભાવયે તં નૃસિંહમ્ ॥ ૧૯॥

સંસારચક્રક્રકચૈર્વિદીર્ણમુદીર્ણનાનાભવતાપતપ્તમ્ ।
કથઞ્ચિદાપન્નમિહપ્રપન્નં ત્વમુદ્ધર શ્રીનૃહરે નૃલોકમ્ ॥ ૨૦॥

મુકુટકુણ્ડલકઙ્કણકિઙ્કિણીપરિણતં કનકં પરમાર્થતઃ ।
મદહઙ્કૃતિસપ્રમુખં યથા નરહરે ન પરં પરમાર્થતઃ ॥ ૨૧॥

નૃત્યન્તિ તવ વીક્ષણાઙ્ગણગતા કાલસ્વભાવાદિભિઃ
ભાવાન્સત્વરજસ્તમોગુણમયાનુન્મીલયન્તી બહૂન્ ।
મામાક્રમ્ય પદાશિરસ્યતિભરં સમ્મર્દયન્ત્યાતુરં
માયા તે શરણં ગતોઽસ્મિ નૃહરે ત્વમેવ તાં વારય ॥ ૨૨॥

મુઞ્ચન્નઙ્ગતદઙ્ગસઙ્ગમનિશં ત્વામેવ સંઞ્ચિતયન્
સન્તઃ સન્તિ યતો યતો ગતમદાસ્તાનાશ્રમાનાવસન્ ।
નિત્યં તન્મુખપઙ્કજાદ્વિગલિતત્વત્પુણ્યગાથામૃત
સ્ત્રોતઃ સમ્પ્લવસમ્પ્લુતો નરહરે નસ્યામહં દેહભૃત્ ॥ ૨૩॥

ત્રૈવિષ્ટપોરુભયહા સ નૃસિંહરૂપં
કૃત્વા ભ્રમદ્ભુકુટિદંષ્ટ્રકરાલવક્ત્રમ્ ।
દૈત્યેન્દ્રમાશુગદયાભિપતન્તમારા
ઊરૌ નિપાત્ય વિદદાર નખૈઃ સ્ફુરન્તમ્ ॥ ૨૪॥

સત્યં વિધાતું નિજભૃત્યભાષિતં
વ્યાપ્તિં ચ ભૂતેષ્વખિલેષુ ચાત્મનઃ ।
અદૃશ્યતાત્યદ્ભુતરૂપમુદ્વહન્
સ્તમ્ભો સભાયાં ન મૃગં ન માનુષમ્ ॥ ૨૫॥

સટાવધૂતા જલદાઃ પરાપતન્
ગ્રહાશ્ચ તદ્દૃષ્ટી વિમુષ્ટરોચિષઃ ।
અમ્ભોદયઃ શ્વાસહતા વિચક્ષુભૂઃ
નિર્હ્રાદભીતા દિગિભા વિચુત્રક્રુષુઃ ॥ ૨૬॥

શૃ‌ઙ્ગારં પદ્મયા યઃ પ્રથયતિ કરુણં દૈત્યપુત્રેણ હાસ્યં
વક્ત્રાકારેણ વીરં રિપુવધવિધિના સિંહવેષેણ રૌદ્રમ્ ।
બીભત્સં રક્તજર્યા શમમપિ મનસા ભીતિમપ્યગૃહાસૈઃ
સ્તમ્ભોત્પત્યાદ્ભુતં નઃ સ નવરસમયઃ શ્રીનૃસિંહઃ પુનાતુ ॥ ૨૭॥

ઇતિ નૃસિંહસ્તવનહારઃ સમ્પૂર્ણઃ ।

Proofread by M K Barman

*Nrisimhastavanaharah*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*